# संस्कृत वार्ता:

दिनाङ्क : 10/07/2026 सायम् - 06:20

आदौ मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी न्यूज़ीलैण्ड्-देशस्य समकक्षीयेण सह वार्तालापं कर्तुं द्विदिवसीययात्रायाम् आक्लैण्ड्-नगरं सम्प्राप्तवान्।
- केन्द्रेण मादकद्रव्याणां नियमेषु संशोधनं कृत्वा अधिक-मद्ययुक्तानां औषध-सूत्रीकरणानां विनियमनं विहितम्।
- उत्तराखण्ड्-राज्ये अत्यधिकवृष्टयै ऋतु-विभागेन रेड्-अलर्ट्-इति रक्त-वर्णीया सञ्चेताना प्रसारिता।
- फ़ीफ़ा-विश्वकप्-क्रीडायां अद्य रात्रौ द्वितीयायां प्रागुपान्त्य-क्रीडायां स्पेन्-देशः बेल्जियम्-देशेन सह प्रतिस्पर्धिष्यति।

---------------------------------------------

प्रधानमन्त्री – न्यूजीलैंड

प्रधानमन्त्री नरेन्द्रमोदी स्वस्य तिसृणां राष्ट्राणां यात्रायाः अन्तिमे चरणे अद्य आक्लैण्ड्-नगरं सम्प्राप्तवान्, यत्र न्यूज़ीलैण्ड-देशस्य प्रधानमन्त्रिणा क्रिस्टोफर् लक्सन् इत्यनेन भव्यं औपचारिकं च स्वागतं विहितम्। आक्लैण्ड्-विमानस्थानके रेड्-कार्पेट्-इत्यत्र प्रधानमन्त्रिणा लक्सन्-वर्येण श्रीमोदिनः व्यक्तिगतरूपेण स्वागतम् कृतम्। प्रधानमन्त्रिणं मोदिनं टर्मेक् इत्यत्र औपचारिकं स्वागतम् अददात्, यत्र भारतस्य न्यूजीलैण्ड्-देशस्य च सशस्त्रसेनायाः प्रतिनिधयः उपस्थिताः आसन्। श्रीमोदी न्यूज़ीलैण्ड्-देशस्य स्वकीयेन समकक्षीयेण क्रिस्टोफर् लक्सन् इत्यनेन सह वार्तालापं करिष्यति। उभौ नेतारौ समग्रस्य द्वैपाक्षिकसम्बन्धस्य समीक्षां करिष्यतः, यस्मिन् विगतद्वयोः वर्षयोः विशेषतः व्यापार-वाणिज्य-रक्षादि क्षेत्रेषु महती प्रगतिः अभवत्। कस्यापि भारतीयप्रधानमन्त्रिणः न्यूज़ीलैण्ड्-देशस्य यात्रा चत्वारिंशत् वर्षेषु प्रथमा यात्रा भविष्यति। श्रीमोदी प्रमुखेभ्यः उद्यमिभ्यः, क्रीडकेभ्यः च सह संवादं साधयिष्यति। भारत-न्यूजीलैण्ड्-देशयोः मध्ये विद्यमानस्य जनानां मध्ये दृढसम्बन्धस्य प्रदर्शनपूर्वकं, प्रधानमन्त्री अस्यां यात्रायाम् भारतीय-प्रवासिनां विशालसमुदायम् अपि संबोधयिष्यति। इतः प्राक्, प्रधानमन्त्रिणा नरेन्द्रमोदिना आस्ट्रेलिया-देशस्य ऐतिहासिकं, उच्चस्तरीयं राज्यपर्यटनं आधिकारिकरूपेण समापितम्, येन भारत-आस्ट्रेलिया-समग्र-सामरिकसहभागित्वस्य कृते भविष्यप्रतिरोधकं प्रारूपं निर्मितम्। प्रधानमन्त्री नरेन्द्रमोदी आस्ट्रेलिया-देशस्य सर्वकाराय, नागरिकेभ्यः, आस्ट्रेलिया-देशस्य प्रधानमन्त्रिणे एन्थोनी अल्बनीस्-वर्याय च स्वस्य यात्रायाः समापन-समये स्नेहपूर्ण-आतिथ्याय कार्तज्ञं प्रकटितवान्।

आस्ट्रेलिया-यात्रायाः समाप्तेः अनन्तरं सामाजिक-पटले श्रीमोदी अवदत् यत् अस्याः यात्रायाः परिणामेन भारत-आस्ट्रेलिया-सहभागित्वम् इतोऽपि सुदृढं जातम् अपि च विविधक्षेत्रेषु सहकारस्य नूतनानि मार्गाणि उद्घाटितानि।

---------------------------------------------

## औषध-नियमाः

केन्द्रसर्वकारेण अधिक-मद्यसार-युक्त-औषधीनां निर्माणस्य विक्रयणस्य च नियन्त्रणं विधातुं पञ्चचत्त्वारिंशदधिक-एकोनविंशतितमायां औषध-नियमावल्यां प्रमुखाः परिष्काराः कृताः। केन्द्रीय-स्वास्थ्य-एवं-परिवार-कल्याण-मन्त्रालयेन एथिल अल्कोहल युक्त-ओषध-स्वरूपेभ्यः पूर्वदत्ता अनुज्ञप्ति-मुक्तिः अधुना समापिता। मन्त्रालयस्य अधिसूचनानुसारं, त्रिंशत्- मिलिलीटर् इत्यतः अधिकमात्रायां स्थिताः सर्वाः ओषधयः, यासु एथिल-मद्यसारस्य मात्रा द्वादश-प्रतिशतं उत वा ततोऽप्यधिकं वर्तते, ताः इतः परं अनुसूची-के इत्यस्यान्तर्गतं प्राप्तायाः मुक्तेः बहिः भविष्यन्ति।एतादृशाणां औषधीय-उत्पादानां कृते ओषधि-एवं-सौन्दर्यप्रसाधन-अधिनियमः चत्त्वारिंशदधिक-एकोनविंशतितमः इत्यस्यान्तर्गतं वैधानिक-अनुज्ञप्तिः प्राप्तव्या भविष्यति। अनेन संशोधनेन मद्ययुक्त-औषधीनां प्रचलने नियामक-निरीक्षणं प्रगाढं भविष्यति, सहैव एतासाम् औषधीनां वितरणं केवलं नियन्त्रित-भेषज-आपूर्ति-शृङ्खलायाः माध्यमेन एव सुनिश्चितं भविष्यति ।

---------------------------------------------

## गोवा-एकः देशः एकं निर्वाचनम्

गोवा-सर्वकारेण देशे प्रस्ताविताय एकः देशः, एकं निर्वाचनम् इत्यस्मै अभियानाय स्वकीयं पूर्णं समर्थनं दत्तम् । एतत् समर्थनं गोवाराज्ये विचार-विमर्शार्थं समागतायाः संयुक्त-संसदीय-समित्याः सम्मुखं उपस्थापितम्। राज्यस्य मुख्यमन्त्री डॉ. प्रमोद-सावन्तः अस्मिन् विषये प्रावोचत् यत्, देशे एकदैव सर्वत्र निर्वाचनेन वारं वारं जायमानानां निर्वाचन-सम्बद्ध-प्रक्रियाणां स्थाने सर्वकाराः विकासात्मक-कार्येषु अधिकं ध्यानं केन्द्रयितुं शक्ष्यन्ति।

---------------------------------------------

## पुरी-इन्धनम्

केन्द्रीय-पेट्रोलियम-प्राकृतिक-गैस-मन्त्री हरदीपसिंह-पुरी अवदत् यत्, सर्वकारः देशे E85 इन्धनं प्रवर्त्तयितुं योजनां निर्माति। सामान्य-E20-पेट्रोल-इन्धनात् प्रतिलीटर-मितात्मकः प्रायः विंशति-रूप्यकाणि यावत् अल्पार्घयुतः भविष्यति। मन्त्रिणा स्पष्टीकृतं यत्, अस्य E85 इतीन्धनस्य उपयोगः

केवलं तादृशेषु विशिष्ट-वाहनेष्वेव भविष्यति, यानि मुख्यरूपेण अस्य इन्धनस्य कृते एव विनिर्मितानि सन्ति। एकया निज-वार्ता-वाहिन्या सह संवादे पेट्रोलियम-मन्त्रिणा प्रतिपादितं यत्, सर्वकारस्य अस्य प्रस्तावित-प्रयासस्य मुख्योद्देश्यं उपभोक्तृभ्यः आर्थिक-साहायता- प्रदानं सहैव देशे सर्वकारस्य एथेनॉल-मिश्रण-कार्यक्रमः तीव्रगत्या अग्रे वर्धेत इति वर्तते।

----------------------------------------------

मेघवाल-मॉनसूनसत्रम्

संसदीय-कार्य-राज्यमन्त्री अर्जुनराम-मेघवालः सहैव डॉ. एल. मुरुगनः इत्येतौ अद्य संसद-भवन-परिसरे आगामिनः वर्षाकालीन-सत्रस्य सज्जतायाः विस्तृत-समीक्षां कृतवन्तौ। संसदः इदं महत्त्वपूर्णं सत्रम् अस्मिन्नेव मासे विंशति-दिनाङ्कादारभ्य आगस्ट-मासस्य त्रयोदश-दिनाङ्कं यावत् प्रचलिष्यति। सामाजिक-सञ्जालीय-तन्त्रांशे सूचयन् श्रीमेघवालः अवदत् यत्, अस्मिन् अवसरे आगामि-सत्रे प्रस्तुतीकरणाय निर्धारितानां प्रमुखाणां वैधानिक-कार्याणां सूक्ष्मा समीक्षा विहिता, सहैव सत्रस्य सुचारु-सञ्चालनाय सम्बन्धितेभ्यः अधिकारिभ्यः आवश्यकाः दिशानिर्देशाः अपि प्रदिष्टाः।

----------------------------------------------

पीयूष-गोयलः

वाणिज्य-उद्योग-मन्त्रिणा पियूष-गोयलेन अद्य नवदिल्ल्यां राष्ट्रिय-उत्पादकता-परिषदः, उद्योग-प्रोत्साहन-विभागस्य, आन्तरिक-व्यापार-विभागस्य, वाणिज्य-विभागस्य च अधिकारिभिः सह समीक्षा-सभायाः अध्यक्षता कृता। सामाजिकान्तर्जालीये पटले श्रीगोयलः अवदत् यत्, अन्तर-विभागीय-सहयोगस्य परिष्कारे, संस्थागत-क्षमतानां सुदृढीकरणे, उत्पादकता सेवा-वितरणस्य च वर्धनाय सर्वोत्तमपद्धतीनां स्वीकरणे च चर्चा केन्द्रिता आसीत्। मन्त्रिणा अधिक-एकीकृतस्य, दक्षस्य, भविष्यस्य कृते सज्जतायाः प्रशासनिक-संरचनायाः निर्माणस्य लक्ष्ययुतानां उपक्रमाणाम् अपि समीक्षा कृता।

----------------------------------------------

ऋतु-विज्ञानम्

भारतर्तु-विभागेन अद्य उत्तराखण्डे पृथक्-पृथक् स्थानेषु अतितः प्रचण्ड-वृष्टेः पूर्वानुमानं कृतम् अस्ति। आगामि दिन-द्वयोः हरियाणायां, हिमाचलप्रदेशे, उत्तरप्रदेशे, बिहारे, पश्चिमबङ्गस्य उपहिमालयीय क्षेत्रेषु, सिक्किमे, ईशान्यभारते देशस्य उत्तरभागेषु च प्रचण्डतः अतिवृष्टिः भवितुम्

अर्हति इति विभागेन उक्तम्। आकाशवाण्या सह वार्तालापं कुर्वन्, आई. एम्. डी. इत्यस्य वैज्ञानिकः डा. शशिकान्तः अवदत् यत् अद्य श्वः च दिल्ली-एन. सी. आर-क्षेत्रस्य कृते कापि पूर्वसूचना नास्ति।

---

<u>फीफा-विश्वकप</u>

फीफा-विश्वकप्-क्रीडायां अमेरिका-देशस्य बोस्टन्-नगरे प्रथमायां प्रगुपान्त्य-क्रीडायां फ़्रान्स्-देशेन मोरक्को-देशः द्वे-शून्यम् इत्यङ्कैः पराजित्य उपान्त्यचक्रीय-क्रीडायां प्रविष्टम्। अद्य रात्रौ द्वितीयायां प्रागुपान्त्य-क्रीडायां स्पेन-देशः बेल्जियम्-देशं सम्मुखीकरिष्यति।

।। इति वार्ता: ।।